International Journal of Sanskrit Research 2021; 7(3): 08-12

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(3): 08-12
© 2021 IJSR
www.anantaajournal.com
Received: 07-03-2021
Accepted: 11-04-2021

**श्री राजीव शर्मा**
सहकारी अध्यापकः, संस्कृत विभाग, जाँजी हेमनाथ शर्मा महाविद्यालय, शिवसागर, असम, भारत

**Corresponding Author:**
**श्री राजीव शर्मा**
सहकारी अध्यापकः, संस्कृत विभाग, जाँजी हेमनाथ शर्मा महाविद्यालय, शिवसागर, असम, भारत

# महाभारतस्य घटना प्रवाहे महात्मा विदुरः एकं अवलोकनम्

**श्री राजीव शर्मा**

**प्रस्तावनाः**

"आदित्यस्योदयस्तात, ताम्बूलं भारती कथा।
इष्टा भार्या सुमित्रञ्च अपुर्वाणि दिनें दिने।।"

महर्षि वेदव्यासस्य अनवद्यः ग्रन्थः महाभारतम्। महाभारतं भारतवर्षस्येकः प्राचीनैतिहासिको ग्रन्थः। रामायणसदृशोऽयमपि भारतीयाणां धार्मिकः ग्रन्थः। अयं 'पञ्चमवेदः' इत्यापि कथ्यते।कौरव-पाण्डवयोः युद्धकाहिनीमेव अवलम्ब्य व्यासः महाभारतं रचितवान्। हस्तिनापुरस्य नृपति विचित्रवीर्यस्य धृतराष्ट्रः पाण्डुः च द्वौ पुत्रौ आस्ताम्। धृतराष्ट्रस्य शत संख्यानां पुत्राः आसन्। तान् कौरवः इति कथ्यन्ते। धृतराष्ट्रः जन्मान्धः आसीत्। अतः तस्य भातृ पाण्डुः राज्यशासनमकरोत्। यदा पाण्डुः मृत्यु अभवत् तदा हस्तिनापुरं विभागं कृत्वा कौरव-पाण्डवयोः मध्ये एकं एकं राज्यं ददाति। परन्तु कौरव पक्षस्य दुर्योधन-दुःशासन प्रभृतयः अति मन्दबुद्धयः आसन्। पाण्डवान् प्रति राज्य दातुं कौरवेन न स्वीकृतवान। अतः तस्य मातुलस्य सहायेन कुटकौशल्येण द्युतक्रीड़ायां पराजितान् पाण्डवाय द्वादश वर्ष वनवासः, एकं वर्ष अज्ञातवास पालयितुं प्रेषितवान्।पाण्डवः तस्य प्रतिज्ञा पुर्ण कृत्वा स्वराज्यं पुणर्ददातुं कौरवं निवेदयत्। परन्तु दुर्योधन पाण्डवाय स्वराज्यं न ददातिस्म। अतः तेषां युद्धकारणं भवन्ति। युद्धे विष्णुरवतारभूतस्य कृष्णः पाण्डवस्य पक्षे आसीत्। युद्धे दुष्टबुद्धिः कौरवाः सम्पूर्ण विनाशं अभवत्।महाभारतस्य एतानि विभिन्नानि घटनाप्रवाहानि मध्ये अनेकानि श्रेष्ठानि चरित्राणि परिलक्ष्यन्ते । तानि चरित्रैः महाभारतस्य सौष्ठवं बृद्धिं जायते । तानि चरित्राणां मध्ये विदुरः अन्यतमः । महाभारतस्य अनेकानि चरित्राणां मध्ये विदुरस्य चरित्रम् एवं श्रेष्ठम् इति मन्ये । विदुरः आसीत् राजा धृतराष्ट्रस्य अमात्यः ।

तस्योपरि सम्बंधतः सः आसीत् पाण्डु-धृतराष्ट्रस्य भ्राता । दासीगर्भात् जन्महेतु सः पाण्डुः तथा धृतराष्ट्रस्य समानं मर्यादां न लब्धवान् । दासीगर्भात् जन्महेतु सः दास्यपुत्रः इत्यारव्याऽपि लभते । सः उपयुक्त समये उपयुक्त वाणी वदितुं कदापि कुण्ठाबोधं न अकरोत् । सः कौरव पाण्डवयोः मध्ये भातृत्ववोधं स्थापयितुं अतीव चेष्ठां कृतः ।अस्मिन् लेखे कौरब-पाण्डवयोः मध्ये शान्तिस्थापनार्थं विदुरस्य भूमिका इत्यादिविषयाः निरूपिताः सन्ति।

**विषयस्य आलोचना :**

कौरवाः मन्दबुद्धयः आसन् । कु-कर्मः, कु-चिन्ता, हिंसा तथा ईर्षा तेषां व्रत आसन् । दुर्योधनः सर्वदा पाण्डवानां अहितं चिन्तयामासः । अतः सः वृद्धराजा धृतराष्ट्रात् अनुमति गृहीत्वा वारणावत नगरे पाण्डवानां निवासस्थानं निश्चीयते । वारणावत नगरे पाण्डवानां निवासहेतुः एकं गृहं निर्मितुं दुर्योधनः तस्य एकं विश्वस्तमन्त्रीं भार अर्पण अकरोत् । तस्मिन गृहे अग्नि निक्षेपं कृत्वा पाण्डव नाशयितुं एव दुर्योधनस्य उद्देश्यम् आसीत् । अतः सः लाक्षा-ग्रन्धकादि पदार्थैः तस्मिन् गृहं निर्माणं कृतवान् । यदा पाण्डवाः वारणावत नगरगन्तुं समयः उपस्थिताः तदा विदुरस्य आशेर्वचन लब्धुं पाण्डवाः विदुरसमीपे आगतवान् । विदुरः दुर्योधनस्य दुष्टबुद्धिं विदित्वा युधिष्ठिरं प्रति म्लेच्छभाषायां उपदेशं दत्वा पाण्डवानां जीवनरक्षां कृतवान् ।विहङ्गं दृष्ट्रात् विदुरः पाण्डवपक्षीयः इति अनुभवं भवति । परन्तु एतत् न, विदुरः धर्मस्य अवतारः आसीत् । स्वयं धर्मराजः माण्डव्यऋषेः शापवशात् विदुररूपे दासीगर्भात् अजायत् । अतः सः कदापि असत्यस्य आश्रयं न लब्धवान् । यत्र यत्र अन्यायं दृश्यते तत्र तत्र सः सक्रिय भुमिकां गृहीत्वा पृथिवीवासीं प्रति महान आदर्शः स्थापयतावान् । विदुरसहायेन जतृगृहात् सुरंगद्वारा जीवनरक्षां कृत्वा पाण्डवाः(कुन्तौसहितं) अरण्यमध्ये आश्रयं गृहीतवान् । तत् समये पाञ्चालराज्ये द्रौपद्याः स्वयम्बर समारोहे गत्वा पाण्डवान् पुणः निजराज्यं आनेतुं अनुरोधं अकरोत् । एवं प्रकारेण विदुरस्य साहार्येन पाण्डवाः भूयं निजराज्यं प्रति प्रत्यागताः ।पाण्डवाः निजराज्यं प्रति यदा प्रत्यागताः तदा धृतराष्ट्रः तान् अर्धराज्यं ददातिस्म । तत्पश्यात् पाण्डवाः खाण्डवप्रस्थे राजधानी निर्माणं कृत्वा सुचारूपेण राज्यशासनमकरोत् । तत् दृष्टा दुर्योधनस्य मनसि अशान्तिं बृद्धिं जायते।

"नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
ना चाभावयतः शान्तिर अशान्तस्य कुतः सुरवम् "।।(२-६६ गीता)

सः द्युतक्रीडायाःद्वारा पाण्डवानां राज्यं हस्तगत कर्तुं बृद्धराजा धृतराष्ट्रात् अनुमतिमलभत् । तद् श्रुत्वा विदुरः अक्षक्रीडायाः अपकारितां विदित्वा द्युत क्रीडाया अनुमतिं पुणर्विवेर्चनाय धृतराष्ट्रं प्रति प्रार्थनामकोरत् । परन्तु अनुमतिं प्राप्य दुर्योधनः द्युतक्रीडा अनुष्ठितवान् । द्युतक्रीडायाः अपकरितां विदित्वा विदुरः द्युतक्रीडाम् आयोजनसमये अपि द्युतक्रीडायाः अपकारिताविषये उक्तवान आसीत् । तद् श्रूत्वा दुर्योधनः विदुरं प्रति अनेकानि कटुवाक्यानि अवदत् । तस्योपरि सः विदुरं अन्यराज्यं गमितुं अपि आदेशं दत्तवान् । तथापि विदुरः सत्यवाक्यं वदितुं कदापि भयं न कृतवान् । सः दुर्योधनं प्रति अवदत् - -"दुर्योधन, संसारे यदा धन सम्पदं तिष्ठति तदा बन्धु-बान्धवाः अपि बृद्धि भवति । परन्तु हितं मनोहारी च दुर्लभं वचः ।"

"दुर्लभं सुनृतं वाक्यं दुर्लभः पण्डितः सुतः।
दुर्लभा सदृशा भार्या दुर्लभः सुजनः प्रियः।।"(चाणक्य नीति श्लोक)
भवतः हितं-अहितं इति विदितुं सामर्थ्य नास्ति।
क्रोधः मनुष्यानां प्रधानं शत्रुः।
"आपदां कभितः पन्था इन्द्रियानाम् संयमः।
तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यताम्।।"(चाणक्य नीति श्लोक)

क्रोधं सम्बरणं कुरू। लौभात् मनुष्याः धर्मभ्रष्टः भवति। भवान धर्ममार्गः गृहीत्वा स्व-वंशस्य यशः बृद्धिं कुरु। विदुरस्य एतानि नीतिवाक्यानि अस्मिन् कालेऽपि ऐक्य -सम्प्रीति तथा भातृत्वबोध स्थापयितुं अतीव आदरणीयम्।

"यत्र नार्यास्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राऽफलाक्रिया।।"

नार्य्याः प्रति सन्मानं कथं भवितुम् अर्हति तत् विषये अपि विदुरः तत् समये उक्तवान् आसीत्। द्रौपद्याः बस्त्रहरणसमये विदुरस्य दुर्योधनं प्रति यानि वचनानि तानि एव अस्मिन् क्षेत्रे उल्लेखयोग्यानि। विदुरेण तत् समये उक्तवान् यत् नार्य्यां प्रति कदापि अवमानना सुचकानि वाक्यानि न वक्तव्यम् । यः नार्य्या अपमानं क्रियते तस्य आर्जितानि सर्वानि पूण्यानि क्षयं भवति। चाणक्य श्लोके अस्ति यत्-

"पितृभिः भ्रातृभिश्रेताः पतिभिदेवरैस्तथा।
पूज्या भूषयितव्याश्चवहु कल्याणमीप्सुभि।।"
विदुरस्य नीतिवचनद्वारा द्युतक्रीडा समाप्ति न अभवत्।
"किं करिष्यन्ति वक्तारः श्रोता यत्र न विद्यते।
नग्नक्षपणके देशे रजकः किं करिष्यति।।"

पाशाक्रीड़ायाः प्रतिज्ञाहेतुः पाण्डवानां द्वादशवर्षा वनवासः एकवर्षंअज्ञातवासं अभवत्। यदा वनवासकालं समाप्तिं भवेत् तदा पाण्डवाः निजराज्यं पुणर्ददातुं धृतराष्ट्रं प्रति निवेदयामासः। परन्तु दुर्योधनः पाण्डवः पुणः राज्यर्ददातुं न स्वीकृतवान्। अतः कौरव-पाण्डवयोः मध्ये युद्ध अनिवार्य अभवत्। अस्मिन् क्षेत्रे बृद्धराजा धृतराष्ट्रः उपायहीनः भूत्वा विदुरमुरवात् नीतिवाक्यं श्रुतुम् इच्छयामासः। युद्धारम्भस्य पूर्वे विदुरमुरवात् निसृतानि यानि वचनानि तानि अतीव श्रेष्ठानि इति मन्ये। तानि महाभारतस्य सोष्ठवं वृद्धिं अकुर्वन्, अपि च जाति वर्ण निर्विशेषे महाभारतस्य आदरं वृद्धिं जायते। विदुरः धृतराष्ट्रस्य मानसिक अवस्थां विदित्वा उक्तवान् आसीत्-"महाराजः यदि दुर्वलजनस्य उपरि शक्तिमानजनस्य आक्रमणस्य शङ्का तिष्ठति तदा दुर्वलजनस्य निद्रा न भवति। यः कामार्तः, चौरः तेषां अपि निद्रा न भवति।"यः आत्मज्ञानी, यः सामर्थ्य अनुसारेण कर्म क्रियते, यः सहनशीलः, यः कामादि विषये आसक्तिहीनः, यः श्रद्धानुसारेण धर्मानुष्ठाने व्रती, यः परहितैषी, यस्य ईश्वरस्य प्रति अथवा परलोके विश्वासः अस्ति, यः रिपुजयी, स एव पण्डितः। तस्योपरि यः असम्भव कार्य सम्भव कर्तुं न इच्छति, यः गतस्य शोचनां न क्रियते, उपयुक्त समये पराक्रमं प्रकाश्यते, अमुल्य समयं न विनश्यते, सन्मानं प्राप्य गर्वितं न भवति, शत्रुनां गोपन रहस्य ज्ञातुं समर्थं भवति सः अपि पण्डितः आख्यां लभते।यः शास्त्रसन्मतः वाणी अपि च हितैषीजनस्य वचनं न सन्मानं क्रियते, स्वयम् एव श्रेष्ठम् इति मन्यते, असत् उपायेन धन-सम्पदः बृद्धि कर्तुं इच्छा क्रियते, मित्रस्य सह असत् व्यवहारं क्रियते, शत्रुनां सह मित्रतां क्रियन्ते, सर्वं प्रति सन्देह भावं पोषयति, कार्यं सहसा क्रियते, सः मूर्खः। अस्योपरि यः पितुः श्राद्धादि कर्म न क्रियते, देवतां प्रति अर्घं न यचते, बहुवल्की, स्वस्य दोषः अन्यस्य उपरि दीयते, परस्त्रीं प्रति दृष्टिं दीयते, सः प्रकृततः मूर्ख एव।विदुरः पुणः अवदत्-विषद्वारा अथवा अस्त्रद्वारा केवलं एकं एव हन्तुं शक्यते। परन्तु कु-विचारेण एकं जाति अथवा एकं देशं विनाशं भवति। कोऽपि सिद्धान्तः कदापि एकाकी न ग्रहीतव्यम्। रात्रौ कदापि एकाकी न गन्तव्यम्, क्षमा मनुष्यानां परमं शक्तिः। युद्धविमुखः राजा, अप्रवासी ब्राहमणः एतद्वयं सत्यमेव पाषण्डम्। क्षमा अपि च दरिद्रान प्रति दानम् एतद्वयं मोक्ष लाभस्य उपायम्। धनवान भुत्वा यः दरिद्रं न यचते, दरिद्रः भुत्वा ईश्वरः आराधना न क्रियते सः पापी। पिता-माता-देवता-मनुष्यः-याचक-अतिथयः एतेषां यः शुश्रूषा क्रियते सः सर्वत्र पुजनीयः भवति। षडदोषं सर्वथा त्यन्तुं कर्तव्यम्-अधिक निद्रा, तन्द्राजनक अवस्था, भयं, क्रोधं, आलस्य अपि च पश्चात् करोमि इति भावः। सत्य, दान, जाग्रतभावः, प्रेम, क्षमा, धैर्य एतानां कदापि न त्यक्तम्। गो-कृषि-स्त्री-विद्या-शुद्र अपि च भृत्यः एताषां प्रति सर्वदा दृष्टि निक्षेपं प्रयोजनम्। रोगहीनता, स्वदेशे बासं, सत्संगे वसति, अनुकुलं जीविका, भयहीन स्थाने वसति एतानि सुखस्य कारणानि। यः परश्रीकातरः सर्वदा असन्तुष्टः परजीवी, निन्दुक सः सर्वदा दुःखी भवति।स्त्री, द्युतक्रीडा, मृगया, मद्यपान, कठोर वचनम्, भयंकर दण्ड, काम एतानि सप्तदोषानि सर्वथा वर्जनीयम्। ब्राहमणानां प्रति द्वेषः, युद्धः, तेषां धनं ग्रहणं, निन्दा, तेषां हन्तुमिच्छा, तेषां प्रशंसा अस्वीकाराः

तेषां विस्मृताः, भिक्षां न दत्वा एतानि सप्तदोषानि नाशप्राप्तयः अन्यतमानि कारणानि।यः मद्यपायी, विषय सुखं प्रति व्याकुलः, धातु दोषहेतुः उन्मादः, प्रति कथायाः क्रोधी, लोभी, भीरु अपि च कामार्तः एतेषां सह कदापि संगति न कर्तव्यम्। यः विपद समये न व्यर्थितं भवति, सावधानेन सर्वाणि कर्माणि क्रियन्ते, तस्य शत्रु सहजेन विनाशं भवति। यः समानं कुलस्य सह वैवाहिक सम्पर्क स्थापनं क्रियते, गुणीजनस्य सह बासं क्रियते तस्य कदापि दुःख न भवति।

**उपसंहारः-**

"यस्मिन देशे न सन्मानं न प्रीतिर्न च बान्धवाः।
न च विद्यागमः कश्चितद्वेशं परिवर्जयेत्।।" (चाणक्य नीतिश्लोक)

यदा स्वराष्ट्रे विदुरस्य नीतिवाक्यं कोऽपि आदरं न अकरोत् तदा सः स्वदेशं त्यक्तवान्। राजगृहस्य मन्त्रित्वपदं त्यक्त्वा, वनवासवृत्तिं गृहीत्वा विदुरस्य निःस्वार्थ मनोभावं पदर्शितवन्तम्। सः अचिन्तयत्-

"कुलक्षयं दृष्टात् देशान्तर एव श्रेष्ठम्।
परिवर्तिनी संसारे मृतः को वा न जायते।।"

धर्मावतारः विदुरः धर्मे हि विलीनः अभवत्। परन्तु तस्य मुखात् निगदितः शाश्वतवाणी अस्मिन् कालेऽपि आदरणीयम्, स्मरणीयम्। 'यतोधर्मस्ततोजयः' इति महाभारतस्य या वाणी सा शाश्वतः इति विदुरवाण्यात् प्रतीयते। हिंसा समाप्तिं हेतु अहिंसा मार्ग एव श्रेष्ठम् इति वाक्यं विदुरः तत् समये उक्तवन्तः। सः उच्चदृष्टिं च नीचदृष्टिं पोषण न कृत्वा समदृष्टि पोषणमकरोत्। स्वकीय सुख निमित्तात् सः असत्यस्य आश्रयः न गृहीतवन्तः। स्ववंश ध्वंसस्य मुलकारणमेव सत्यवचनस्य अभावः इति विदुरमतम्। उपयुक्त समये उपयुक्त कथा वक्तुं कदापि भयं न कर्तव्यम्, अन्यथा विनाशः निश्चितः इति विदुरशिक्षायाः मूलमस्ति। अन्ध अनुकरणेन सम्प्रीति अपि भातृत्वबोधं अवलोपं भवति इति कथा विदुरः तत् समये उक्तवान् आसीत्। द्रौपद्याः वस्त्रहरणसमये युद्धारम्भस्य प्रारम्भे विदुरः यानि वाक्यानि उक्तवान् तानि ऐक्य, सम्प्रीति तथा भातृत्वबोधं प्रति यथेष्ठम्। राज्ञां प्रति भयं न कृत्वा विदुरः सत्यवाक्यम् उक्तवान्।गुरु प्रभृतयः सन्मानिताः जनान् प्रति भक्तिः अपि च कणिष्ठजनान् प्रति स्नेहः केन प्रकारेण करणीयः तानि अपि विदुरमुखात् निगदितः। धृतराष्ट्रं प्रति तस्य भाषणकाले मुक्तित्वं, ज्ञानतत्वं, भक्तितत्वं प्रभृतयः वचनानि विश्वशान्तेः तथा विश्वभातृत्वबोधं प्रति अतीव स्मरणीयम्। पाशाक्रीडायाः कुप्रभावःसामाजिक व्याधिरीतिः, सत्यरक्षाः प्रतिज्ञापालनं प्राणेभ्योऽपि महदिति विदुरस्य मतादर्श सर्वजन समादृतम्। श्रीकृष्णः यदा दूतरूपेण दुर्योधनस्य राजसभायाः पदार्पणम् अकरोत् तदा दुर्योधनस्य राजकीय आतिथ्यं त्यक्ता विदुरगृहे निशायापन अकरोत्। सत्यवादी, महात्मा विदुरस्य पक्षे एतत् सौभाग्यम् अतीव श्रेष्ठम्। सत्यसन्धः विदुरस्य एतादृशः त्यागः, आदर्शः, सत्यवाक्यः संहति स्थापनाय यथेष्टः इति मन्ये।यदि विदुरमुरवात् निगदितानि वाक्यानि अस्मिन् काले जनाः समादरं क्रियन्ते, तर्हि समाजे तथा देशे कुत्रापि असुया, अप्रीति न भविष्यन्ति। सर्वत्र शांति प्रतिष्ठां भविष्यन्ति। अपि च समाजे संहति स्थापने विदुरस्य एतादृशानि वाक्यानि प्रासंगिकः भविष्यन्ति।

**सन्दर्भग्रन्थाः-**


1. Mishra. Acharya Ramachandra, Sanskrit Sahiteitihasa, Chowkhamba Vidyabhawan. Varanasi.
2. दाहालः, लोकमणि संस्कृत साहित्येतिहासः कृष्णदास अकादेमी, वाराणसी
3. पाण्डेय, मिथिलेश. गाइड वुक, उपकार प्रकाशन, आग्रा -2
4. शर्मा, थानेश्वर. संस्कृत साहित्यर इतिवृत्त, चन्द्र प्रकाश, पानवजार, गुवाहाटी -2.
5. गोस्वामी, देवमोहन, संस्कृत साहित्यर वुरञ्जी, बुकलेण्ड, पानवजार, गुवाहाटी -2.
6. ठाकुर, रवीन्द्रनाथ. प्राचीन साहित्य, विश्वभारती, कलिकता -1970

7. भट्टाचार्य, विमानचन्द्र. संस्कृत साहित्येर इतिहास, कलिकता, 1382
8. त्रिपाठी, राधावल्लभ, संस्कृत साहित्य का अभिनव इतिहास, विश्वविद्यालय प्रकाशन, वाराणसी.
9. Agrawal HRA. Short History of Sanskrit Literature, Delhi.
10. Bhatt GK. Sanskrit Drama, Delhi, 1985.
11. De SK, Dasgupta SN. History of Sanskrit Literature, Vol I. Calcutta 1980.
12. Vaidya CV. History of Sanskrit Literature (Vedic) Poona 1930.